## तदस्य पण्यम् । (५१/१६०१)

तद् इति प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं पण्यं चेत् तद् भवति । अपूपाः पण्यमस्य आपूपिकः । शाष्कुलिकः । मौदकिकः । पण्यम् इति विशेषणं [1]तद्धितवृत्ताव[2]न्तर्भूतमतः पण्य-शब्दो न प्रयुज्यते ॥

## लवणाट् ठञ् । (५२/१६०२)

लवणशब्दाद् ठञ् प्रत्ययो भवति तदस्य पण्यम् इत्येतस्मिन् विषये । ठकोऽपवादः । स्वरे विशेषः । लवणं पण्यमस्य लावणिकः ॥

## किशरादिभ्यः ष्ठन् । (५३/१६०३)

किशर इत्येवमादिभ्यः[3] ष्ठन् प्रत्ययो भवति तदस्य पण्यम् इत्येतस्मिन् [4]विषये । ठकोऽपवादः । किशरा-दयो [5]गन्धविशेषवचनाः । किशराः पण्यमस्य किशरिकः । किशरिकी । नरदिकः । नरदिकी ।

किशर । [6]नरद । [7]नलद । [8]सुमङ्गल । [9]तगर । गुग्गुलु[10] । उशीर । हरिद्रा । [11]हरिद्रायणी । किशरादिः ॥

## शलालुनोऽन्यतरस्याम् । (५४/१६०४)

शलालुशब्दादन्यतरस्यां [12]ष्ठन् प्रत्ययो भवति तदस्य पण्यम् इत्येतस्मिन् [13]विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । शलालुशब्दो गन्धविशेषवचनः । शलालु पण्यमस्य शलालुकः । [14]शलालुकी । शालालुकः । [15]शालालुकी ॥

## शिल्पम् । (५५/१६०५)

तद् इति [16]प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत् प्रथमासमर्थं शिल्पं चेत् तद्भवति । शिल्पं [17]कौशलम् । मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः । पाणविकः । [18]वैणिकः (म. भा. २. ३३२) । मृद-ङ्गवादने वर्तमानो मृदङ्गशब्दः प्रत्ययमुत्पादयति । शिल्पं [19]तद्धितवृत्तावन्तर्भवति ॥

---

1. तद्धित नास्ति ब. ह. 2. अन्तर्भूतमिति ब, अन्तर्भवति इति ड. फ. ह. 3. प्रातिपदिकेभ्यः इत्यधिकम् ब. 4. अर्थे फ. 5. गन्ध नास्ति फ, सुगन्धिद्रव्यवाचिनः क, गन्धविशेषवाचिनः ब. 6. नदर ब. 7. नलन स्फग फ. 8. सुगल क. ड, स्थगल ब. 9. तगल ह. 10. छगल इत्यधिकम् ह. 11. हरिद्रपर्णी ब. इ, हरिद्रापण्य ह. 12. ठन् फ. 13. अर्थे फ. ह. 14–15. नास्ति फ. 16. प्रथमासमर्थविभक्तिः । षष्ठ्या यथा अर्थोऽनुवर्तते ब. फ. 17. कर्म ड. 18. वैणिकः नास्ति फ. ड, वैणिको वैणविकः हि नारदः इति वीणाविषयं विज्ञानातिशयं शिल्पशब्दो वक्ति । वीणा हि विद्या शिल्पतुल्यत्वात् शिल्पमित्यन्ये क.ड. 19. तद्धित नास्ति ह.